भिक्षु न्याय कर्णिका

रचयिता
आचार्य श्री तुलसी

प्रबन्ध सम्पादक
छगनलाल शास्त्री

श्री तेरापथ द्विशताब्दी समारोह के अभिनन्दन में

जैन दर्शन ग्रन्थमाला सातवाँ पुष्प

प्रकाशक —
सेठ मन्नालालजी सुराना
मेमोरियल ट्रस्ट,
८१, सदर्न एवेन्यू, कलकत्ता-२९


प्रबन्धक —
आदर्श साहित्य संघ
चूरू (राजस्थान)

प्रथम संस्करण १०००
अगस्त, १९६०

मूल्य १ रुपया

मुद्रक
रेफिल आर्ट प्रेस,
३१, बड़तल्ला स्ट्रीट,
कलकत्ता—७

समर्पण



येन स्वल्पमुपादायि,
मादायि बहुतो बहु।
महान्यायविदे तस्मै,
भिक्षवेऽसौ समर्प्यते॥

—आचार्य तुलसी

भूमिका

'अपरीक्ष्य दृष्टं नैवेव सिद्धि'[1] इति भगवतो महावीरस्य वाणी न्यायशास्त्रस्याखिलाया महत्त्वपूर्णाऽस्ति घोषणा। न्याययुगेऽस्या महान् विस्तारः जातः। तत्र विचारकरणं वीतरागे परिचायकमभूत्। गानमन एव—

"अस्तित्वपक्ष्यता कथितः तनेद विचार्यते।
निर्दोषं काञ्चनं चेत् स्यात् परीक्षाया बिभेति किम्॥"

परीक्षाया भावा शुद्धि गतस्तदा न्यायशास्त्रस्य विकासो जातः। जैन परम्परायां न्यायस्य बीजानि सन्ति तावदागमिकानि। तानि विकासमुपेयिवांसि सिद्धसेनस्य न्यायावतारेण सह। उत्तरोत्तरं तानि विशाल-भावमुपगतानि। अनेकैराचार्यैश्च स्वप्रतिभाया पाटवं प्रकटी चक्रे। फलतः समुपलभ्यन्त एतद्विषयकोऽनेके विशालकाया ग्रन्था।

१—अपरिक्खदिट्ठं ण हु (एव) सिद्धी।

सूत्रकृताङ्ग १।७।१९

रुचिरतरोत्तरं विमर्शनं नवानि नवानि रूपाणि । कदाचित् सा विस्तारमिच्छति कदाचिदिच्छति सङ्क्षेपम् । अद्य समयासङ्कुलं जगत् सर्वमपि वाञ्छति संक्षिप्तम् सद्यो प्राप्यम् । विद्यार्थिनां रुचिस्तु विशेषतोऽत्र द्रष्टव्या ।

संक्षिप्तरुचीनां न्यायशास्त्रे सहसा प्रवेशः स्यादिति धिया व्यरचि मयाऽनेकशास्त्रसमुद्धृतसारोऽसौ श्री भिक्षुन्यायकर्णिका ।

आचार्यवरो भिक्षुस्वामी सिद्धान्तमार्गे शब्दप्रमाणहेतुवादयोः समन्वयस्य । महात्मना तेन चक्रे प्रयोगः आज्ञाप्रधानक्षेत्रे, हेतुवाद-विषये च तस्यैव, उभयोः क्षेत्रे तदुभयोरेव ।

बाह्यजगताऽन्तर्जगतः कः सम्बन्धः ? धर्मस्य-मोक्षं प्रति साधनं मानवमात्रहितो बाह्यजगत् प्रति किं कर्तृत्वम् ? अमुष्मिन् विषये आचार्य भिक्षो-र्हृदयं सन्ति खलु मार्मिकाः । तत्तु पद्मगिरेः सृजति नवम-ध्यानम् । केचिद् दार्शनिकाः बाह्यजगता सम्बन्धविच्छेदस्थितावपि अन्तर्जगतोऽभिमुखमुपदिशन्ति । जैनदर्शनमेतत् विभेदयत्र । बाह्य जगता यावन्न सम्बन्धविच्छित्तिस्तावन्नैव मुक्तिः । मुक्तेः साधनं मुक्तिरेवेति सम्मतम् । अन्तर्जगत्तु मुक्तैरेव साधनैः प्राप्यम्, नान्यथा । बन्धनं स्याद् यदि मुक्तेः साधनं तत्स्यात् स्वयं तन्मुक्तिः । प्रोक्तमतो

भिक्षुस्वामिना—ज्ञानदर्शनचारित्रं विना मुक्तेर्नास्ति कश्चिदुपाय[1]। 'ह्रेपाणि कर्माणि संसारस्य, तैरात्मा बध्यते[2]। बन्धन हिंसा मुक्ति-रहिंसा च। प्राणव्यपरोपणं हिंसा प्राणाव्यपरोपणमहिंसेति व्यवस्था स्थूला। तेन सुबोधमिति—मुक्ति-र्मुक्त्या लभ्या, बन्धनञ्च बन्धनेन। मुक्ति स्वभावो बन्धनञ्च विभाव। 'तदपि बन्धन-मनादिपरिचितं मुक्तिश्च स्वल्पपरिचिता[3]। 'तेन सांसारिणस्तत् (बन्धनम्) प्रशंसन्ति न तु मुमुक्षव[4]।

आत्मना सूक्ष्मशरीरस्य—कार्मणस्य सर्वशरीरहेतुभूतस्य निमित्त नैमित्तक भावोऽस्ति कथञ्चित्, तावदान्तरिकस्य जगतो बहिस्तनेन जगता सम्बन्धो जायते। कार्मणेन आत्मन प्रवृत्ति, तेन स्थूलशरीरोपादानम् तत्र इन्द्रियाणां मनसश्चाभिनिर्वृति, तैश्च स्वगोचराणां ग्रहणम् तत्र च प्रियाप्रिययो रागद्वेषौ, ताभ्याञ्च कर्मबन्ध तेन च कार्मणस्य पोष —इत्थमयं संसार—जन्ममरणयो परम्परा प्रवर्तते !

१—अनुकम्पा ८।१७

२— „ ४।२२

३—जम्बू कुमार चारित्र २।१५

४—अनुकम्पा ११।३८

कार्मणशरीरेण मुक्तिर्या सैव मोक्ष । विना न तेन स्थूलशरीरस्य न सम्भूति । तामृते न जन्म । नाशो हि तेन (जन्मना) न मृत्यु । अन्यत्र तस्मान्न संसार । मोक्षेण न संसार, संसारेण च न मोक्ष । अतएव मोक्षार्थिना न जन्म एष्टव्य न च मरणम् । केवल तेन संयमो भिकाङ्क्षणीय । किञ्च, संयमो बाह्य जगता—अनात्मिकेन पदार्थेन सम्बन्ध विनिवर्तयति । तेन स मोक्षोपायो मोक्षो वा । संयममयं जीवनम् संयममयो मृत्यु—द्वावपि प्रार्थनीयौ । नानाभिलाषा जीवन मरणयो, किन्तु तयोर्योऽत्र संयमस्य, तस्यैव ।

इन्द्रियाणां मनसश्च विषय—वस्तुबोध, सोऽपि आत्मन खल्वनात्मिकेन—आत्मातिरिक्तेन—बाह्यवस्तुजातेन सह सम्बन्ध । किन्तु नासौ सहज हिंसामहिंसाञ्च सम्वद्धनाति । ज्ञेय प्रति ज्ञातृत्वेनना-व्यापार सोऽय भवति ग्राह्यग्राहकसम्बन्ध । असौ रागद्वेषसवलितो जनयति विकारम् । शुभप्रत्ययश्च प्रवर्तिनश्च जनयति वैशद्यम् विकारो हिंसा वैशद्यमहिंसा च । हिंसा बन्धनस्य निबन्धनम्, अहिंसामुक्ते । अनयोर्वैपरीत्येन ग्रहणम्—मिथ्यादर्शनम् याथातथ्येन ग्रहणञ्च सम्यग्दर्शनम् । ये जीवानां वधेऽपि अहिंसा प्ररूपयन्ति ते न केवल हिंसका अपितु मृषाभाषिण, अदत्ताहारिणोऽपि । जीवान्

व्यापाद्य जीवपोषणं न अहिंसा—इति सत्यम्, तत्र जीवपापमयाय जीव-प्रमथनेऽपि दर्शनं प्रस्फयन्तो भवन्ति मृषासत्यम्—इति ते असत्यवादिनः। म्रियमाणा जीवाश्च न दद्युः स्वप्राणापहाराय स्वीकृतमिति तदऽदत्तहारिणोऽपि। एवं जीवनस्य वस्तुभन्देषु यस्य भवति भिनवान् हेतुवादानुरमिवत्तस्य महात्मनः पुण्यस्मर्तां द्विशताब्दी-समारोहसम्पादकुसुवहनाम्न्यनाम्ना समलङ्कृताऽसौ प्रथा जैनन्याय प्रविविक्षूणां जिज्ञासानां सुनिश्चितं भावी सदा सादविधायी।

नाथद्वारा (मेदपाटप्रदेशे)
ज्येष्ठ शुक्ला ११, सं० २०१७

आचार्य तुलसी

प्रज्ञापना

श्रद्धा जीवन का सम्बल है। उसके सहारे व्यक्ति आत्म-अभ्युदय के पथ पर आगे बढ़ता परिश्रान्ति अनुभव नहीं करता। पर वह और अधिक सुपुष्ट बन जाता है, यदि उसे सत् तर्क का साहचर्य मिल जाए। यही कारण है, जैन दर्शन, जो श्रद्धा को प्रामुख्य दिये चलता है, तर्क और युक्ति को उपेक्षणीय नहीं मानता। जैन न्याय का बहुमुखी विकास इसका प्रमाण है।

जैन न्याय कहीं बाहर से नहीं आया, आगमों में इसके बीज बिखरे पड़े हैं, जिनका तर्क निष्णात आचार्यों एवं विद्वानों ने सचयन किया और उन्हें अंकुरित, पल्लवित तथा पुष्पित बनाया। अपने युग की साहित्यिक भाषा तथा विस्तार को संक्षेप में सूचित करने में विशेष सक्षम होने से उन्होंने संस्कृत में नैयायिक ग्रन्थों की रचना की। विधिवत् न्याय शास्त्र के रूप में महत्त्वपूर्ण वाङ्मयात्मक देन देनेवाले मनीषियों में विद्वद्वर आचार्य सिद्धसेन दिवाकर तथा आचार्य समन्तभद्र

पुरुष स्मरणीय हैं। और भी अनेक सात्विक आचार्य एवं विद्वान् हुए, जिन्होंने इसे उत्तरोत्तर विकसित किया।

न्याय शास्त्र को अत्यन्त सरल एवं बोधगम्य भाषा तथा शैली में रखने का अभिप्रेत लिये इस युग के अद्भुत मनीषी, अणुव्रत आन्दोलन के प्रवर्तक, तेरापंथ के नवम अधिनायक आचार्य श्री तुलसी ने तेरापंथ के आद्य प्रवर्तक महान् तत्त्वद्रष्टा आचार्य श्री भिक्षु की पुण्य स्मृति में 'भिक्षु न्याय कर्णिका' नामक इस पुस्तिका की रचना कर नैयायिक वाङ्मय की शाश्वती शृंखला में एक महत्त्वपूर्ण कड़ी जोड़ दी है। जैन न्याय के अध्येताओं के लिए निःसन्देह यह स्वल्प पुस्तिका कलेवर में छोटी पर विषय निरूपण में अत्यन्त उपयोगी सिद्ध होगी। सूत्र और वृत्ति में आचार्यप्रवर ने सांनिध्य व सारल्य की जो सम्यक् अनुस्यूति की है, इससे विद्यार्थियों को न्याय के सिद्धान्त कण्ठाग्र करने में बड़ी सुविधा रहेगी।

श्री तेरापंथ द्विशताब्दी समारोह के अभिनन्दन में इस पुस्तिका के प्रकाशन का दायित्व सेठ मन्नालालजी सुराना मेमोरियल ट्रस्ट कलकत्ता ने स्वीकार किया, यह अत्यन्त हर्ष का विषय है।

तेरापंथ का प्रसार, तत्सम्बन्धी साहित्य का प्रकाशन, अणुव्रत-

आन्दोलन का जन जन में संचार ट्रस्ट के उद्देश्यों में से मुख्य हैं। इस पुस्तिका के प्रकाशन द्वारा अपनी उद्देश्य-पूर्ति का जो महत्वपूर्ण कदम ट्रस्ट ने उठाया है, वह सर्वथा अभिनन्दनीय है।

जन जन में सत्तत्त्व प्रसार, नैतिक जागरण की प्रेरणा तथा जन-सेवा का उद्देश्य लिये चलने वाले इस ट्रस्ट के संस्थापन द्वारा प्रमुख समाजसेवी, साहित्यानुरागी श्री हनुमानमलजी सुराना ने समाज के साधन सम्पन्न व्यक्तियों के समक्ष एक अनुकरणीय कदम रखा है। इसके लिए वह सादर धन्यवाद हैं।

आदर्श साहित्य संघ, जो सत्साहित्य के प्रकाशन एवं प्रचार-प्रसार का ध्येय लिए काम करता आ रहा है, इस महत्वपूर्ण प्रकाशन का प्रबन्ध भार ग्रहण कर अत्यधिक प्रसन्नता अनुभव करता है।

जैन-न्याय के विद्यार्थियों के लिए यह पुस्तिका विशेष लाभप्रद सिद्ध होगी, ऐसी आशा है।

३१ बड़तल्ला स्ट्रीट,	जयचन्दलाल दफ्तरी
कलकत्ता	व्यवस्थापक
भाद्र कृष्ण ५, २०१७।	आदर्श साहित्य संघ

भिक्षु न्याय कर्णिका

अर्हम्

श्री भिक्षुन्यायकर्णिका

श्री स्याद्वादोपदेष्टारं तीर्थेशं त्रिशलात्मजम् ।
भक्त्याभिनम्य कुर्वेऽहं श्री भिक्षुन्यायकर्णिकाम् ॥

प्रथमो विभागः

युक्त्यार्थपरीक्षणं न्यायः ॥ १ ॥

साध्यसाधनयोरविनाभावो युक्तिः, अथवाऽविरोधो वा । नीयते प्राप्यतेऽर्थसिद्धिर्येन स न्यायः ।

प्रमाणं, प्रमेयं, प्रमितिः, प्रमाता चेति चतुरङ्गः ॥२॥

प्रमाणम्—साधनम्, प्रमेयम्—वस्तु, प्रमितिः—फलम्, प्रमाता—परीक्षकः ।

अर्थसिद्धयै तत्प्रवृत्तिः ॥ ३ ॥

अर्थस्य प्रादुर्भावः, इष्टावाप्तिः, अनिष्टनिवृत्तिर्वेति त्रिविधाऽर्थसिद्धिः ।
तत्र न्यायस्य प्रवृत्तिः साक्षाज्ज्ञप्तिसाधनमेव ।

सा च लक्षणप्रमाणाभ्याम् ॥ ४ ॥

व्यवच्छेदकधर्मो लक्षणम् ॥ ५ ॥

वस्तुनो व्यवस्थापनहेतुभूतो धर्मो लक्ष्यं व्यवच्छिनत्ति—साङ्कर्यमपनयतीति लक्षणम्, यथा—जीवस्य चैतन्यम्, अग्नेरौष्ण्यम्, गोः सास्नावत्त्वम्। क्वचित्कादाचित्कमपि, यथा—दण्डी पुरुषः।

अव्याप्त्यतिव्याप्त्यसम्भविनस्तदाभासाः ॥ ६ ॥

असत् सदिव आभासमानमिति तदाभासः।

लक्ष्यैकदेशवृत्तिरव्याप्तः ॥ ७ ॥

यथा—पशोर्विषाणित्वम्, आत्मनः शरीरवत्त्वम्।

लक्ष्यालक्ष्यवृत्तिरतिव्याप्तः ॥ ८ ॥

यथा—वायोर्गतिमत्त्वम्, साधोः सम्यक्त्ववत्त्वम्।

लक्ष्यमात्रावृत्तिरसम्भवी ॥ ९ ॥

यथा—मुक्तानां पुनरावृत्तित्वम्, पुद्गलस्य चेतनत्वम्।

यथार्थज्ञानं प्रमाणम् ॥ १० ॥

प्रकर्षेण (संशयाद्यभावेन) मीयतेऽर्थो येन तत् प्रमाणम्। ज्ञानम्—अर्थप्रकाशकम्। ननु अयथार्थमपि भवतीति तद्व्यवच्छित्तये यथार्थमिति विशेषणम्। प्रमेयं नान्यथा गृह्णातीति यथार्थत्वमस्य।

अयथार्थश्च विपर्ययसंशयानध्यवसायाः ॥ ११ ॥

अतस्मिंस्तदध्यवसायो विपर्ययः ॥ १२ ॥

यथा—[illegible] [illegible] [illegible] [illegible]
शब्दो नित्य एव वा अनित्य एव वा ॥

अनिर्णायको विकल्पः संशयः ॥ १३ ॥

यथा—[illegible] [illegible] वा। [illegible] [illegible] [illegible],
यथा—[illegible] [illegible] [illegible]।

आलोचनमात्रमनध्यवसायः ॥ १४ ॥

अत्र [illegible][2]

१—[illegible] विपर्यय [illegible]
[illegible], [illegible] [illegible] [illegible]
[illegible] भवेत्।

२—[illegible] [illegible] [illegible] [illegible]। [illegible] [illegible]
[illegible] भिन्नः।

३—[illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] जायते न तु [illegible] न यथा [illegible] [illegible] [illegible]
[illegible] भवति।

प्रामाण्यनिश्चय स्वत परतो वा ॥ १६ ॥

अभ्यासदशायां प्रामाण्यनिश्चय स्वतो भवति । अनभ्यासदशायां प्रमाणान्तरात्, संवादकात्, बाधकाभावाद् वा ।

इति श्री तुलसीगणिविनिर्मितायां श्री भिक्षुन्यायकर्णिकायां लक्षण-प्रमाणस्वरूपनिर्णयो नाम प्रथमो विभाग ।

द्वितीयो विभाग

तत् प्रत्यक्ष[1] परोक्ष[2] ॥ १ ॥

अक्षम्—इन्द्रियम् अक्षो जीवो वा । अक्ष प्रतिगत प्रत्यक्षम् । अक्षेभ्योऽक्षाद्वा परतो वर्तते इति परोक्षम् । यथायत्वावच्छिन्ना यावन्तो ज्ञानप्रकारास्तावन्त एव प्रमाणस्य भेदा । प्राधान्येन तद् द्विभेदम् । क्वचित्—"प्रत्यक्षानुमानोपमानागमा" इति चतुर्धापि । अर्थापत्त्यादीनां[3] यथासम्भवमेष्वेवान्तर्भाव[4] ।

१—बाह्यार्थग्रहणापेक्षया ज्ञानस्य प्रत्यक्षता परोक्षता च, स्वरूपापेक्षया तु सर्वमपि प्रत्यक्षमेव ।

२—परशब्दसमानार्थकेन पर शब्देन परोक्षमिति सेत्स्यति ।

३—अभाव —प्रमाणपञ्चकं यत्र, वस्तुरूपे न जायते ।

वस्तुसत्तावबोधाय, तत्राभावप्रमाणता ॥

(श्लोक वार्तिक पृष्ठ ४७)

सहायनिरपेक्षं प्रत्यक्षम् ॥ २ ॥

यस्मिन् प्रमाणान्तराणां पौरुषलिङ्गेन्द्रियाणाञ्च साहाय्यं नापेक्ष-णीयं तत्प्रत्यक्षम्, अव्यवहितात्ममात्रापेक्षत्वादस्य प्रत्यक्षम् ।

तच्च चेतनस्य निरावरणस्वरूपं केवलम् ॥३॥

अर्थापत्तिः—अर्थादापत्तिरर्थापत्तिः, आपत्ति—प्राप्तिः, प्रसङ्गः, यथाऽभिधीयमानेऽर्थे योऽन्योऽर्थः प्रसज्यते सोऽर्थापत्तिः यथा— पीनो देवदत्तो दिवा न भुङ्क्ते, रात्रौ अवश्यं भुङ्क्ते ।

सम्भवः—अविनाभाविनोऽर्थस्य सत्ताग्रहणादन्यस्य सत्ताग्रहणं सम्भवः अयं द्विविधः—सम्भावनात्मकः, यथा—अमुको मनुष्यो वैश्योऽस्ति, अतो धनिकोऽपि स्यात्, निर्णयात्मकः यथा— अमुकस्य पार्श्वे यदि शतमस्ति, तत् पञ्चाशदवश्यं भाव्यम् ।

ऐतिह्यम्—अनिर्दिष्टवक्तृकं प्रवादपारम्पर्यम् ।

प्रातिभम्—वागगोचरमस्ति, न तु प्रातिभमस्ति ।

सन्ध्येव दिनरात्रिभ्यां, केवलश्रुतयोः पृथक् ॥

(अध्यात्मोपनिषद्)

४—अर्थापत्तिः सम्भवश्चानुमाने अभावः प्रत्यक्षे तर्केऽनुमानेऽपि च, ऐतिह्यमागमे, प्रातिभं प्रत्यक्षेऽनुमाने च ।

निखिलद्रव्यपर्यायसाक्षात्कारित्वात् केवलज्ञानं पूर्णं प्रत्यक्षम्। निरावरणत्वञ्च ज्ञानावरणविलयेन।

अपूर्णमवधिमनःपर्यायौ ॥ ४ ॥

आवरणसद्भावात् एतौ अपूर्णप्रत्यक्षे भवतः।

रूपिद्रव्यसाक्षात्करणमवधिः ॥ ५ ॥

द्रव्यक्षेत्रकालभावैर्विविक्षितमर्यादावद्धत्वाद् अवधिः। अनुगाम्य-ननुगामिवर्धमानहीयमानप्रतिपात्यप्रतिपातिभेदात् षोढा।

मनोद्रव्यपर्यायसाक्षात्कारि मनःपर्यायः[1] ॥ ६ ॥

अवग्रहेहावायधारणात्मकं व्यवहारे ॥ ७ ॥

एतद् इन्द्रियमनःसापेक्षत्वेन आत्मनो व्यवहितत्वात् परमार्थतः परोक्षमपि[2] स्पष्टत्वाद् व्यवहारे प्रत्यक्ष[3] भवति।

१—(क) अनेन पौद्गलिकमनसः पर्यायाणां साक्षात्कारो भवति, न तु भावमनसः, अमूर्तत्वात् तेषाम्।

(ख) विशुद्धिक्षेत्रस्वामिविषयभेदादवधिमनःपर्याययोर्भेदः।

विशुद्धिकृतो भेदः—यानि हि मनोद्रव्याणि अवधिज्ञानी जानीते, तानि मनःपर्यायज्ञानी विशुद्धतराणि जानीते।

इन्द्रियार्थयोगे दर्शनानन्तरं सामान्यग्रहणमवग्रहः ॥८॥

इन्द्रियार्थयोरर्थानन्तरावस्थानरूपे योगे सति, दर्शनम् अनु-
ल्लिखितविशेषस्य सत्तामात्रस्य प्रतिपत्तिः, तदनन्तरम्, अनिर्देश्य

क्षेत्रकृतो भेदः—अवधिज्ञानमङ्गुलस्याऽसंख्येयभागादिषु भवति आसर्वलोकात्, मनःपर्यायो मनुष्यक्षेत्र एव।

स्वामिकृतो भेदः—अवधिः संयतस्याऽसंयतस्य संयता-संयतस्य च भवति, मनःपर्यायस्तु संयतमनुष्यस्यैव।

विषयकृतो भेदः—रूपिद्रव्येष्वसर्वपर्यायेष्ववधेर्विषयः। तदनन्तभागे मनःपर्यायस्य।

२—इन्द्रियमनःसाहाय्येन जायमानं ज्ञानमात्मनो व्यवहितं भवतीति आत्मपरोक्षं कथ्यते। इन्द्रियमानसेभ्यो ऽव्यवहितमिति संज्ञायते इन्द्रियप्रत्यक्षं मानसप्रत्यक्षम्।

३—एतत् सांव्यवहारिकप्रत्यक्षम्। आत्मदृष्ट्या परोक्षमिन्द्रियमनःप्रत्यक्षमपि कथ्यते।

सामान्यस्य (वस्तुनः) ग्रहणमवग्रहः । दर्शनानन्तरमिति क्रमप्रतिपादनार्थम्, एतेन दर्शनस्यावग्रहं प्रति परिणामिता ज्ञेया ।

व्यञ्जनार्थयोः ॥ ९ ॥

व्यञ्जनेन—इन्द्रियार्थसम्बन्धरूपेण, व्यञ्जनस्य—शब्दादिरूपस्य, ग्रहणम्—अव्यक्तः परिच्छेदः, व्यञ्जनावग्रहः[1] । ततो मनाग् व्यक्तं जातिद्रव्यगुणकल्पनारहितमर्थग्रहणम्—अर्थावग्रहः[2], यथा एतत् किञ्चिद् अस्ति[3] ।

न नयनमनसोर्व्यञ्जनम् ॥ १० ॥

व्यञ्जनम्—इन्द्रियार्थसम्बन्धः । नयनमनसोरर्थेन साक्षात्सम्बन्धो न भवतीति व्यवहितप्रकाशकत्वात् नैते प्राप्यप्रकाशके । स्वच्छवस्तु-नश्चक्षुषि[4] प्रतिबिम्बेऽपि साक्षात्सम्बन्धाभावात् नात्र दोषः ।

१—व्यञ्जनेन व्यञ्जनस्य अवग्रहः—व्यञ्जनावग्रहः । अयमान्तर्मौहूर्तिकः ।

२—एकसामयिकः ।

३—अनध्यवसायो न निर्णयोन्मुख इति न प्रमाणम् । अवग्रहस्तु निर्णयोन्मुख इति प्रामाण्यमस्य ।

४—तदाकारा भिन्नपुद्गलाः ।

अमुकेन भाव्यमिति प्रत्यय ईहा ॥ ११ ॥

अवग्रहगृहीतो य इति संशयात्पूर्वमन्वयव्यतिरेकपुरस्सरम् अमुकेन भाव्यमिति प्रत्यय ईहा यथा—शब्देन भाव्यम्।

अमुक एवेत्यवायः ॥ १२ ॥

यथा शब्द एव।

स्मृत्याधारभूता धारणा ॥ १३ ॥

स एव संस्कार इत्युच्यते यथादि। इयमेव स्मृतेः परिणामि कारणम्।

असामस्त्येनाप्युत्पद्यमानत्वात् अपूर्वापूर्ववस्तु-पर्यायप्रकाशकत्वात् क्रमभावित्वाच्च एते व्यतिरि-च्यन्ते ॥ १४ ॥

आशूत्पादात् क्वचित् क्रमानुपलक्षणमेषाम् ॥ १५ ॥

यथा दृढतरं विद्युदादावप्यनुपलक्षणमात्।

प्रतिनियतार्थग्रहणमिन्द्रियम् ॥ १६ ॥

स्पर्शरसगन्धवर्णशब्दग्राहकाणि
स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि ॥ १७ ॥

प्रत्येकं द्विधा ॥ १८ ॥

तत्र निर्वृत्युपकरणे पौद्गलिके ॥ १९ ॥

आकाररचना निर्वृत्ति । तत्र विषयग्रहणोपकारिणी शक्ति उपकरणम् । एते द्वे अपि पुद्गलरूपत्वात् पौद्गलिके ।

आत्मिके लब्ध्युपयोगौ ॥ २० ॥

कर्मविलयविशेषोद्भव आत्मप्रकाश —लब्धि, तद्व्यापारग्रहण-व्यापार —उपयोग । सत्यां लब्धौ निर्वृत्त्युपकरणोपयोगा । सत्यां च निर्वृतौ उपकरणोपयोगौ । सत्युपकरणे उपयोग ।

सर्वार्थग्रहण त्रैकालिक मन ॥ २१ ॥

मनो, न त्विन्द्रियवत् प्रतिनियता अर्था गृह्यन्ते ऽनेन तत् सर्वार्थग्रहणम् त्रिकालगोचरम्[1]—मन । मननालम्बनभूता पुद्गला —पौद्गलिक मन । आत्मिकं मन —लब्ध्युपयोग-रूपम् ।

इति श्रीतुलसीगणिनिर्मितायां श्री भिक्षुन्यायकर्णिकायां प्रत्यक्ष-स्वरूपनिर्णयो नाम द्वितीयो विभाग ।

१—त्रिकालगोचरत्वाद् आलोचनात्मकत्वमस्य स्वभावापतितम् ।

तृतीयो विभागः

सहायापेक्षं परोक्षम् ॥१॥

परसहायापेक्षं प्रमाणमस्पष्टत्वात् परोक्षम्।

मतिश्रुते ॥२॥

इन्द्रियमनोनिबन्धनं मतिः[1] ॥३॥

स्मृतिप्रत्यभिज्ञातर्कानुमानानि तत्प्रकाराः ॥४॥

संस्कारोद्बोधसम्भवा तदित्याकारा स्मृतिः ॥५॥

संस्कारः—धारणारूपः, तस्य उद्बोधात्—जागरणाद् उत्पन्ना, तदित्युल्लेखवती मतिः स्मृतिरुच्यते, यथा—तत्तीर्थकरागमनम्, स भिक्षुस्वामी।

अनुभवस्मृतिसम्भवं तदेवेदं तत्सदृशं तद्विलक्षणं तत्प्रतियोगीत्यादिसंकलनं[2] प्रत्यभिज्ञा ॥६॥

यथा—स एवायं मालुम्भा, गोसदृशो गवयः, गोविलक्षणो महिषः, इदमस्माद् दूरम्, इदमस्मान्नेदीयः। क्वचिद्[3] व्यस्ताभ्यामपि।

१—आभिनिबोधिकमस्यास्य पर्यायः।

२—एकत्वसादृश्यवैसादृश्यादिनाऽर्थद्वयघटनम्—संकलनम्।

३—केवलेनाऽनुभवेन केवलेन स्मरणेनाऽपि प्रत्यभिज्ञा जायते।

अन्वयव्यतिरेकनिर्णयस्तर्कः ॥७॥

साधने सति साध्यस्य, साध्ये एव वा साधनस्य भावः—अन्वयः यथा—यत्र धूमस्तत्राग्निः, अग्नावेव वा धूमः। साध्याभावे साधनाभावः—व्यतिरेकः यथा—अग्न्यभावे न धूमः।

साधनात् साध्यज्ञानमनुमानम् ॥८॥

सिसाधयिषितं साध्यम् ॥९॥

व्याप्तौ धर्म एव, यथा—यत्र यत्र धूमस्तत्र तत्र वह्निः, अनुमितौ तु साध्यधर्मविशिष्टो धर्मी,[1] यथा—अग्निमान् पर्वतः, धर्मी एव पक्षः। पक्षवचनं प्रतिज्ञा।

१—अयं क्वचित् बुद्धिसिद्धः (विकल्पसिद्धः) यथा—अस्ति सर्वज्ञः। अत्र सर्वज्ञस्याऽस्तित्वे साध्ये सर्वज्ञो बुद्धिसिद्धः, नासौ ह्यस्तित्वसिद्धेः प्राक् प्रत्यक्षादिप्रमाणसिद्धः। क्वचित् प्रमाणसिद्धः यथा—अग्निमानयं प्रदेशः। अत्र धूमवत्त्वाद् अग्निमत्त्वे साध्ये तस्य प्रदेशः पर्वतः खलु प्रत्यक्षेणाऽनुभवते। क्वचिदुभयसिद्धः, यथा—अनित्यः शब्दः। अत्र वर्तमानः शब्दः प्रत्यक्षगम्यो भूतभविष्यच्च बुद्धिगम्यः।

[illegible] ॥[illegible]॥

[illegible]

[illegible] ॥[illegible]॥

[illegible]

[illegible] ॥[illegible]॥

[illegible] यथा—[illegible]। [illegible]

यथा—[illegible]।

[illegible] ॥[illegible]॥

[illegible] यथा—[illegible]। [illegible],

यथा—[illegible]।

[illegible]

प्रतिषेधयोः ॥[illegible]॥

([illegible])

[illegible]।

[illegible]—

(१) [illegible]—[illegible]।

(२) सहचर —आम्रे रसम् रूपात्।

(३) व्याप्य —अस्त्यत्र वृक्षत्वम् निम्बात्।

(४) पूर्वचर —अद्य सोमवार, ह्यः रविवारश्रुतेः।

(५) उत्तरचर —अद्य रविवार, श्वः सोमवारश्रुतेः।

(६) कार्यम्—सावित्र्य नभ, आतपात्।

(७) कारणम्—भाविनी वृष्टि, विशिष्ट-मेघोन्नते।

ख—अभावेन विधिहेतव —अनेकान्तात्मक वस्तु, एकान्तस्वभावा-नुपलब्धे।

ग—भावेन प्रतिषेधहेतव —नात्र शीतस्पर्श, अग्ने।

घ—अभावेन प्रतिषेधहेतव —नात्र पुस्तकम् दृश्यानुपलब्धे।

अन्यानि उदाहरणानि स्वयं बोध्यानि[1]।

१—(१) विधिहेतव —

(क) भावेन विधिहेतव (अविरुद्धोपलब्धेः साधनानि) स्वभावादयो यथा शास्त्रे निर्दिष्टा।

भावेन विधिहेतौ अविरुद्धस्य व्यापकस्योपलब्धि साधन नहि भवति। अस्त्यत्र, वृक्षत्वम्, निम्बादिव अस्त्यत्र निम्बत्वम्, वृक्षादिति न निर्णायकता, वृक्षत्वेन निम्बवदाम्रस्यापि ग्रहणात्।

(ख) अभावेन विधिहेतवः (विरुद्धानुपलब्धौ साधनानि)—

(१) विरोधिस्वभावानुपलब्धिरुदाहृता।

(२) विरोधिकारणानुपलब्धिः—विद्यतेऽत्र समीचीनेऽज्ञानम् शिक्षाभावात्। अत्र विधेयमज्ञानम्, तद्विरुद्धं ज्ञानम् तस्य कारणं शिक्षा, तस्या अभावात्।

(३) विरोधिकार्यानुपलब्धिः—अस्वास्थ्यमस्मिन् मनुष्ये समस्ति, मांसलताऽनालोकनात्। अत्र विधेयमस्वास्थ्यम्, तद्विरुद्धं स्वास्थ्यम्, तस्य कार्यं मांसलता, तस्या अनुपलब्धिः।

(४) विरोधिव्याप्यानुपलब्धिः—अस्त्यत्र छाया, औष्ण्याऽनुपलब्धेः। अत्र विधेया छाया, तद्विरुद्धस्तापः, तद्व्याप्यस्यौष्ण्यस्याऽनुपलब्धिः।

(२) प्रतिषेधहेतवः—

(क) भावेन प्रतिषेधहेतवः (विरुद्धोपलब्धौ साधनानि)

(१) विरोधिस्वभावोपलब्धिः, यथा—नास्त्येव सर्वथैकान्तः, अनेकान्तस्योपलम्भात्।

(२) विरोधिव्याप्योपलब्धिः यथा—नास्त्यस्य पुंसस्तत्त्वेषु निश्चयः, तत्र संदेहात्।

(३) विरोधिकार्योपलब्धि, यथा—न विद्यतेऽस्य क्रोधो-पशान्ति, वदनविकारादेः ।

(४) विरोधिकारणोपलब्धि, यथा—नास्य महर्षेरसत्यं वचः समस्ति, रागद्वेषकालुष्याऽकलङ्कितज्ञानसम्पन्नत्वात् ।

(५) विरोधिपूर्वचरोपलब्धि, यथा—नोद्गमिष्यति मुहूर्तान्ते पुष्पतारा, रोहिण्युद्गमात् ।

(६) विरोध्युत्तरचरोपलब्धि यथा नोदगात् मुहूर्तात्पूर्वं मृगशिर पूर्वाफाल्गुन्युदयात् ।

(७) विरोधिसहचरोपलब्धि, यथा—नास्यास्य मिथ्याज्ञानम्, सम्यग्दर्शनात् ।

(ख) अभावेन प्रतिषेध्येन च (अविरुद्धानुपलब्धेः साधनानि)

(१) स्वभावानुपलब्धिरुदाहृता ।

(२) व्यापकानुपलब्धि, यथा—नास्त्यत्र प्रदेशे पनस, पादपा-नुपलब्धेः ।

(३) कार्यानुपलब्धि, यथा—नास्त्यप्रतिहतशक्तिकं बीजम्, अंकुराऽनवलोकनात् ।

[illegible] [illegible] ॥१५॥

[illegible] — [illegible] । [illegible] — [illegible] । [illegible] — [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] ।

[illegible] , ॥१६॥
[illegible] ॥१७॥

[illegible] [illegible] [illegible] [illegible] [illegible] — [illegible] [illegible] — [illegible] [illegible], [illegible] ।

(१) [illegible] — [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।

(२) [illegible] — [illegible] — [illegible] [illegible] [illegible] [illegible] ।

(३) [illegible] — [illegible] — [illegible] [illegible] [illegible] [illegible] ।

(४) [illegible] — [illegible] — [illegible] [illegible] [illegible] ।

([illegible] — १, [illegible] १०१)

साध्यविपरीतव्याप्तो विरुद्ध ॥१८

विवक्षितसाध्याद् विपरीते एव व्याप्तो हेतु—विरुद्ध , यथा नित्य शब्द , कार्यत्वात् ।

१—नैयायिकानां कालात्ययापदिष्टप्रकरणसमौ विशिष्टौ स्त तत्र प्रत्यक्षागमविरुद्धपक्षवृत्ति कालात्ययापदिष्ट , यथा—अनुष्णोऽग्नि , कृतकत्वाद्, घटवत् । प्रकरणपक्षे प्रतिपक्षे च तुल्य प्रकरणसम , यथा—अनित्य शब्द , नित्यधर्मानुपलब्धे , घटवत् । इत्युक्ते पर प्राह—नित्य शब्द , अनित्यधर्मानुपलब्धे आकाशवत् ।

२—अयं त्रिविधो भवति—(१) वादि असिद्ध , (२) प्रतिवादि असिद्ध , (३) उभयाऽसिद्ध ।

(१) परिणामी आत्मा, उत्पादादिमत्त्वात् । अयं वादिनो नैयायिकस्याऽसिद्ध । तन्मते आत्मन कूटस्थनित्यत्वाभिमतत्वात् ।

(२) चेतनास्तरव सर्वत्वगपहरणे मरणात् । अत्र मरणं विज्ञानेन्द्रियायुर्निरोधलक्षण प्रतिवादिनो बौद्धस्याऽसिद्धम् ।

(३) अनित्य शब्द , चाक्षुषत्वात् । अयमुभयाऽसिद्ध ।

अयथाऽनुपपद्यमानोऽर्थोपशिष्ट ॥१६॥

यथा—अनाक्रम्य [illegible]। [illegible]।

[illegible] ॥१७॥

[illegible]।

[illegible]।

[illegible]।

व्याप्तिनिर्णीते प्रवृत्ते दृष्टान्त ॥१८॥

[illegible]।

अन्वयी व्यतिरेकी च ॥१९॥

१—(क) [illegible]।

(ख) [illegible]—[illegible] [illegible] [illegible]। [illegible]—[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]।

[illegible]—[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]।

साध्यव्याप्तसाधननिरूपणमन्वयी ॥ २३ ॥

(अनित्य शब्द, कृतकत्वात् इति हेतौ) यत् कृतकं तत् अनित्यम् यथा घट।

साध्याभावे साधनाभावनिरूपणं व्यतिरेकी ॥२४॥

यन्नानित्यं तन्न कृतकम् यथा—आकाशम्। साध्यसाधनोभयविकला असिद्धसन्दिग्धसाध्यसाधनोभया।

विपरीतान्वयव्यतिरेकाश्च तदाभासा[1] ॥ २५ ॥

यथा—(१) अपौरुषेय शब्द, अमूर्तत्वात्, दुःखवत्।

(२) यद् अपौरुषेयं न भवति, तद् अमूर्तमपि न भवति यथा—परमाणु।

(३) विवक्षित पुमान् रागी, वचनात्, रथ्यापुरुषवत्।

(४) यो यो रागी न भवति, स स वक्तापि न भवति, रथ्यापुरुषवत्। शेषमनया दिशाऽभ्यूह्यम्[2]।

१—तदाभासा इति दृष्टान्ताभासा।

२—(क) अन्वयदृष्टान्ताभासा—

(१) साध्यविकल—अपौरुषेय शब्द, अमूर्तत्वात्, दुःखवत्।

दुःखं पुरुषव्यापारजन्यत्वात् पौरुषेयमिति पौरुषेयत्वम्
सत्त्वेऽपि अपौरुषेयत्वं नास्ति इति साध्यविकलत्वम्।

(२) साधनविकल—अपौरुषेयः शब्दः, अमूर्तत्वात् परमाणुवत्। अत्र अपौरुषेयत्वरूपं साध्यमस्ति किन्तु साधनधर्मोऽमूर्तत्वं नास्ति तस्य मूर्तत्वादिति साधनविकलत्वम्।

(३) उभयविकल—अपौरुषेयः शब्दः अमूर्तत्वात्, घटवत्। अत्र साध्यमपौरुषेयत्वं साधनममूर्तत्वमुभयमपि घटे नास्तीति उभयविकलत्वम्।

(४) सन्दिग्धसाध्य—विशिष्टः पुरुषः रागी, वक्तृत्वात्, रथ्यापुरुषवत्। रथ्यापुरुषे हि साध्यभूतो रागः सन्दिग्धः रागस्याप्रत्यक्षत्वात् तस्य निश्चेतुमशक्यत्वात्, इति सन्दिग्धसाध्यत्वम्।

(५) सन्दिग्धसाधन—विशिष्टः पुरुषः मरणधर्मा, रागात्, रथ्यापुरुषवत्। रथ्यापुरुषे साधनधर्मो रागः सन्दिग्धः इति सन्दिग्धसाधनत्वम्।

(६) सन्दिग्धोभय—विशिष्टः पुरुषः अल्पज्ञः, रागात्

रथ्यापुरुषवत्। रथ्यापुरुषेऽप्यत्र रागद्वेषौ चेति उभयमपि सिद्धमिति सन्दिग्धोभयत्वम्। एवं परावस्थस्य दुर्बोधत्वाद् अन्यथापि रथ्यापुरुषे रागामक्तत्वयो सत्त्व सन्दिग्धम्।

(७) विपरीतान्वय—अनित्य शब्द, कृतकत्वात्। यदनित्यं तत् कृतकम्, घटवदिति विपरीतान्वय। प्रसिद्धानुवादेनाऽप्रसिद्धं विधेयम्। अत्र कृतकत्व हेतुरिति प्रसिद्धम्। अनित्यत्व तु साध्यत्वाद् अप्रसिद्धम्। अनुवादे प्रसिद्धस्य यच्छब्देन अप्रसिद्धस्य च तच्छब्देन निर्देशो युक्त। अत्र च विपर्यय इति विपरीतान्वयत्वम्।

(ख) व्यतिरेकिदृष्टान्ताभासा—

(१) असिद्धसाध्य—यदऽपौरुषेयं न भवति तदऽमूर्त्तमपि न भवति, यथा—परमाणु, अपौरुषेयत्वात् परमाणूनाम्।
(परमाणोरपौरुषेयत्वेऽपि मूर्त्तत्वमिति व्यतिरेक)

(२) असिद्धसाधन—यदऽपौरुषेयं न भवति तदऽमूर्त्तमपि न भवति, यथा—दुःखम्, अमूर्त्तत्वाद् दुःखस्य।
(दुःखस्य पौरुषेयत्वेऽपि अमूर्त्तत्वमिति व्यतिरेक)

(३) असिद्धोभय—यदऽपौरुषेयं न भवति तदऽमूर्तमपि न भवति, यथा—आकाशम्, अपौरुषेयत्वादमूर्तत्वाच्च आकाशस्य।

(आकाशाऽपौरुषेयत्वेऽपि अमूर्तत्वादपि नेति व्यतिरेकः)

(४) सन्दिग्धसाध्य—विवक्षितः पुमान् रागी, वचनात्, रथ्यापुरुषवत्।

(५) सन्दिग्धसाधन—विवक्षितः पुमान् मरणधर्मा, रागात्, रथ्यापुरुषवत्।

(६) सन्दिग्धोभय—विवक्षितः पुमान् अज्ञः, रागात् रथ्यापुरुषवत्।

एषु परचेतोवृत्तेर्दुर्लक्ष्यत्वात् व्यतिरेकेऽपि रथ्यापुरुषे रागाद्यभावयोरसत्त्वं सन्दिग्धम्।

(७) विपरीतव्यतिरेक—अनित्यः शब्दः, कृतकत्वात्, यत् ऽकृतकं तन्नित्यं यथाऽऽकाशमिति विपरीतव्यतिरेकः। व्यतिरेके हि साध्याभावे साधनाभावस्य व्याप्तिर्निर्देष्टव्या। न चात्रैवमिति विपरीतव्यतिरेकत्वम्। अनन्वय, अप्रदर्शितान्वय, अव्यतिरेक, अप्रदर्शितव्यतिरेकेति चत्वारोऽपरेऽपि दृष्टान्ताभासा भवन्ति।

यथा—

(१) विवक्षितः पुमान् रागी, वक्तृत्वाद्, इष्टपुरुषवदित्यनन्वयः। यद्यपि इष्टपुरुषे रागो वक्तृत्वञ्च साध्यसाधनधर्मौ दृष्टौ, तथापि यो यो वक्ता स स रागीति व्याप्त्यसिद्धेरनन्वयत्वम्।

(२) अनित्यः शब्दः, कृतकत्वाद्, घटवद्, इति अप्रदर्शितान्वयः। सन्नपि अन्वयो वचनेन न प्रकाशित इति परार्थानुमानस्य वचनदोषः।

(३) न वीतरागः कश्चिद् विवक्षितः पुरुषः वक्तृत्वात्। यः पुनर्वीतरागो न स वक्ता यथोपलखण्ड इति अव्यतिरेकः। यद्यप्युपलखण्डादुभयं व्यावृत्तं तथापि व्याप्त्या व्यतिरेकासिद्धेरव्यतिरेकत्वम्।

(४) अनित्यः शब्दः, कृतकत्वात्, आकाशवदिति अप्रदर्शितव्यतिरेकः। यदऽनित्यं न स्यात् तत् कृतकमपि न स्यादिति सन्नपि व्यतिरेको नोक्तः।

धर्मिणि साधनस्योपसंहार उपनयः ॥२६॥

दृष्टान्तधर्मिणि विसृतसाधनधर्मस्य साध्यधर्मिणि उपसंहार उपनयः, यथा तथा चायम्।

साध्यस्य निगमनम् ॥२७॥

साध्यधर्मस्य धर्मिणि उपसंहारो निगमनम्, यथा—तस्मादनित्यः।

प्रतिषेधश्चतुर्धा प्राक् प्रध्वंस इतरेतरोऽत्यन्तश्च ॥२८॥

उत्पत्तेः पूर्वं कारणे कार्यस्याऽसत्त्वं प्राक् ॥२९॥

अयमनादिसान्तः, यथा—पयसि दध्नः।

लब्धात्मलाभस्य विनाशः प्रध्वंसः ॥३०॥

अयं सादिरनन्तः, यथा—दध्नि दुग्धस्य।

परस्परापोह इतरेतरः ॥३१॥

अयं सादिसान्तः, यथा—स्तम्भे कुम्भस्य।

सर्वदा तादात्म्यनिवृत्तिरत्यन्तः ॥३२॥

कालत्रयेऽपि तादात्म्याऽभाव इत्यर्थः। अयमनाद्यनन्तः, यथा—चेतने अचेतनस्य।

अन्यथाऽनादित्वानन्तत्वसर्वैकात्मकत्वोपपत्तेः ॥३३॥

प्रतिषेधचतुष्टयास्वीकारे भावानां क्रमशः अनादिता, अनन्तता, सर्वात्मकता, एकात्मकता च स्यात्, इति भाववद् अभावोऽपि वस्तुधर्म एव।

कार्यनिष्पत्त्यपेक्ष्यं कारणम् ॥३४॥

कार्यमुत्पद्यमानं नियतं यद् अपेक्षते तत् कारणम् ।

उपादाननिमित्तभेदाद् द्वयम् ॥३५

कारणमेव कार्यतया परिणममानमुपादानम् ॥३६॥

परिणामि कारणमिति, यथा—घटस्य मृत्पिण्डः, अङ्कुरस्य च बीजम् ।

साक्षात् साहाय्यकारि निमित्तम् ॥३७॥

सहकारीति यावत्, यथा—घटस्य चक्रकुलालादि, अङ्कुरस्य वा जलपवनादि । नियतमस्तु न नाम नियममपेक्ष ऽङ्कुरस्य तृणादौ । यत्र घटादौ कुलालवद् अप्यपेक्षा तत्र निमित्तान्तरम् एवमपि कारणद्वयमेव ।

तद्व्यापारानन्तरं भावि कार्यम् ॥३८॥

तत्—इति कारणद्वयस्य व्यापारानन्तरं यद् भवति तत् कार्यम् ।

सकर्तृकमकर्तृकम् ॥३९॥

तत्र सकर्तृकम्—घटकलशोल्लकादि ।

अकर्तृकम्—अनुत्पाद्यपुरुषनिज भूम्यादि ।

इति श्री तुलसीगणिनिर्मितायां श्री भिक्षुन्यायकर्णिकायां परोक्षे प्रमाणस्वरूपनिर्णयो नाम तृतीयो विभागः ।

चतुर्थो विभागः

शब्दाद्यनुसारिणी मतिरेव श्रुतम् ॥१॥

यत् मानसं ज्ञानं शब्दसंकेतानुसारेण[1] जायते, तत् श्रुतमुच्यते ।

मतिश्रुतयोरन्योन्यानुगतयोरपि[2] कथञ्चिद् भेदः, यथा—

(१) मननं मतिः, शब्दः श्रुतम् ।

(२) मूककल्पा मतिः, स्वमात्रप्रत्यायनरूपत्वात्,

अमूककल्पं श्रुतम्, स्वपरप्रत्यायकत्वात्

(३) मतिपूर्वकं श्रुतम्, न तु मतिः श्रुतपूर्विका ।

(४) वर्तमानविषया मतिः, त्रिकालविषयं श्रुतम् ।

(५) वल्कसमा मतिः, कारणत्वात् । शुम्बसमं श्रुतम् तत्कार्यत्वात् ।

तदाप्तवचनाज्जातमागमः[3] ॥२॥

तदपि श्रुतम् । यथा—अस्ति क्षीरसमुद्रः । अस्त्यत्र स्वादु जलम् ।

१—शब्दादयश्च श्रुतज्ञानस्य साधनमिति 'द्रव्यश्रुतम्' उच्यते ।

२—यत्र मतिः तत्र श्रुतम्, यत्र श्रुतं तत्र मतिरिति ।

३—वचनादिति मुख्यत्वेन संकेतादयोऽपि ग्राह्याः ।

आप्तवचनम् — आगमः, तत्तु उपचारात्, वस्तुवृत्त्या वर्णपदवाक्यात्मकं वचनं पौद्गलिकत्वाद् द्रव्यश्रुतम्, अर्थज्ञानात्मकस्य भावश्रुतस्य साधनं भवति।

यथार्थविद् यथार्थवादी चाप्तः[1] ॥३॥

लौकिकोऽ[2]लौकिकश्च[3] ॥४॥

क्रमेण जनकादिस्तीर्थंकरादिश्च ॥५॥

आदिशब्दाज्जनन्यादीनां गणधराचार्यादीनाञ्च ग्रहणम्।

सहजसामर्थ्यसमयाभ्यां हि शब्दोऽर्थप्रतिपत्तिहेतुः ॥६॥

शब्दः — वचनम्, सहजसामर्थ्यम् — शब्दस्यार्थप्रतिपादनशक्तिः योग्यतानाम्नी, समयः — संकेतः, ताभ्यां हि शब्दोऽर्थप्रतिपत्तिहेतुर्भवति, नान्यथा।

अर्थप्रकाशकत्वमस्य स्वाभाविकं प्रदीपवत्, यथार्थत्वमयथार्थत्वञ्च वक्तृगुणदोषानुसारि ॥७॥

१—आप्यते सम्यगर्थो यस्मादिति आप्तः।

२—लोके सामान्यजने भवो लौकिकः।

३—मोक्षमार्गोपदेष्टा लोकोत्तर इति।

अर्पितानर्पिताभ्यामनेकान्तात्मकार्थप्रतिपादनपद्धतिः स्याद्वादः[1] ॥८॥

एकत्र वस्तुनि विरोध्यविरोधिनामनेकधर्माणां स्वीकारः—अनेकान्तः[2], तदात्मकस्य अर्थस्य एकस्मिन् समये एकस्य धर्मस्य अर्पणया शेषाणामनर्पणया प्रतिपादकं वचः, स्यात्पदयुक्तत्वात् स्याद्वादः[3] कथ्यते।

१—अपेक्षानपेक्षाभ्याम्, विवक्षाविवक्षाभ्याम्, प्रधानगौणभावाभ्याम्।

२—अनेकान्तवादो वस्तुनि सर्वधर्माणां ग्राहकः, स्याद्वादश्च अपेक्षाभेदेन विरोधपरिहारे तेषां प्रतिपादक इत्यनयोर्भेदः। यथा—वस्तु नित्यञ्च अनित्यञ्च इति अनेकान्तः, द्रव्यापेक्षया नित्यम् पर्यायापेक्षया च अनित्यमिति स्याद्वादः। अमुकस्मिन् वस्तुनि अमुको धर्मः अमुकापेक्षया इति शेषधर्मान् गौणीकृत्य अभेदवृत्त्यापन्नस्य एकस्य धर्मस्य कथञ्चित् मुख्यताप्रतिपादनं स्याद्वादस्य फलम्। तेन नानेकान्तवादो वस्तुस्वरूप-प्रतिपादने स्याद्वादनिरपेक्षः।

३—कथञ्चिद्वादः, अपेक्षावाद इति नामान्तराणि। अभेद-विवक्षया यौगपद्येन अशेषवस्तुप्रतिपादकत्वाद् असौ सकलादेशः, प्रमाणवाक्यमपि कथ्यते।

नायमेकत्र नानाविरुद्धधर्मप्रतिपादक किन्तु अपेक्षाभेदेन[1] तद्विरोध परिहारक्षमस्ति।

विधिनिषेधविकल्पै सोऽनेकभङ्गः ॥९॥

अनेके भङ्गा —विकल्पा —वचनप्रकारा वा यस्य, स स्याद्वाद अनेकभङ्गो भवति।

यथा स्यादस्तीति, स्यान्नास्तीति, स्यादवक्तव्यश्चेति ॥१०॥

स्यात् शब्दोऽनैकान्तद्योतक। तत्र स्वद्रव्यक्षेत्रकालभावापेक्षया सर्वमस्तित्वम् परद्रव्यक्षेत्राद्यपेक्षया नास्तित्वम्, युगपदुभयधर्मापेक्षया चाऽवक्तव्यत्वमिति[2]। वस्तुन प्रतिधर्ममेते त्रयो भङ्गा योज्या।

१—दृष्टिभेदेन, अभिप्रायभेदेन।

२—स्वरूपेण सत्त्वम्, पररूपेण च असत्त्वम्—इति नास्ति कश्चिद् विरोध। उक्तञ्च—

सदसत्ति स्वरूपेण, पररूपेण नास्ति च।

अन्यथा सर्वसत्त्व स्यात्, स्वरूपस्याप्यसम्भव ॥

तथा हि—अस्ति हि घटो द्रव्यत, पार्थिवत्वेन, न जलादित्वेन। क्षेत्रत पाटलिपुत्रकत्वेन, न माथुरादित्वेन,। कालत —शैशिरत्वेन, न वासन्तिकादित्वेन। भावत —श्यामत्वेन, न रक्तादिमत्त्वेन।

सयोगमाश्रयतारोऽन्यद् यानि¹ तद्योगज सामग्री भावत।
प्रमाण स्याद्वचनमेतेष्वयथाप्तवाक्यप्रतिनियतार्थप्रकाशि ॥११॥

स्वार्थं परार्थञ्च ॥१२॥

अर्थानवबोधकत्वात् ज्ञानस्य वाग्रूपत्वात् स्वार्थम्—स्वसंवेद्यम्। श्रुतं परार्थमपि। तत्र शब्दोन्मुखं शब्दानुसारि वा स्वार्थम्, परं प्रत्यायनाय वागभिनिबद्धं परार्थम्।

यत् परार्थं तन्नयवाक्यापरपर्याय सद्वाद² एव ॥१३॥

१—(१) स्यादस्त्येव स्यान्नास्त्येवेति क्रमतो विधिनिषेध-कल्पनया।
(२) स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया, युगपद्विधिनिषेधकल्पनया।
(३) स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेध-कल्पनया, युगपद्विधिनिषेधकल्पनया।
(४) स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतो विधिनिषेधकल्पनया, युगपद्विधिनिषेधकल्पनया।

२—अयं भेदप्राधान्याद् भेदोपचाराद् वा क्रमेण वस्तुधर्मान् प्रतिपादयति, न तु एककाले समये अनेकान्, इत्यसौ विकलादेशोऽपि कथ्यते।

अखण्डवस्तुन एकधर्मप्रकाशनपरो वाद् सद्वाद । एकस्मिन् समये एकस्यैव धर्मस्य प्रतिपादयितु शक्यत्वात्, वस्तुन सद्वाद एव परार्थं भवति ।

> प्रमाणवाक्य[1] परार्थम्, तत्तु अभेदप्राधान्याद् अभेदोपचाराद्[2] वा ।

इति श्री तुलसीगणिनिर्मितायां श्री भिक्षुन्यायकर्णिकायां परोक्षे श्रुतस्वरूपनिर्णयो नाम चतुर्थो विभाग ।

पञ्चमो विभागः

अनिराकृतेतरांशो वस्त्वंशग्राही प्रतिपत्तुरभिप्रायो नय [3] ॥१॥

अन तधर्मात्मकस्य वस्तुनो विवक्षितमश गृह्णन्, इतरांशान्

१—अखण्डवस्तुन प्रतिपादक वाक्य प्रमाणवाक्यम् ।

२—अखण्डवस्तुन एको धर्म शेषैरशेषैरपि तद्धर्मैं अभेदवृत्ति-भाप न एव तत् प्रतिपादयति । ज्ञान यथा एकस्मिन् समये अनेकान् धर्मान् जानाति, तथा नैक कश्चित् शब्द य स्त्वेकस्मिन् समये अनेकान् धर्मान् प्रतिपादयेदिति, प्रमाणवाक्यं यद् अखण्ड वस्तु प्रतिपादयति, तत् मुख्यगौण भावेनैव ।

३—असौ सदेकान्तोऽपि कथ्यते ।

अनिराकृतस्य प्रतिपत्तुरभिप्रायः—नयः। प्रमाणस्य विषयः अखण्डं वस्तु नयस्य च तदंशः, नयो नाऽप्रमाणं न प्रमाणं किन्तु प्रमाणांशः यथा—समुद्रैकदेशो न समुद्रो नाऽप्यसमुद्रः किन्तु समुद्रांशः।

द्रव्यार्थिकः पर्यायार्थिकश्च ॥ २ ॥

प्राधान्येन अभेदग्राही द्रव्यार्थिकः भेदग्राही च पर्यायार्थिकः। यावन्तो विचारमार्गास्तावन्तो नयाः इति नयानामानन्त्येऽपि वर्गीकरणमनयोर्द्वैविध्यम्।

आद्यस्त्रेधा ॥ ३ ॥

नैगमः, संग्रहः व्यवहारश्च।

भेदाभेदग्राही नैगमः ॥ ४ ॥

अभेदः—सामान्यम्—द्रव्यं धर्मी वा,

भेदः—विशेषः—पर्यायो धर्मो वा।

एतदुभयग्राही अभिप्रायो नैगमः।

सामान्यविशेषयोर्नास्ति सर्वथा भेदः, यथा—"निर्विशेषं न सामान्यम्, विशेषोऽपि न तद् विना॥" केवलं तयोः प्राधान्या

प्राधान्येन निरूपणं भवतीति विचारणायास्य वृत्तिः, यथा सुखी जीवः, जीवे सुखम्।

सङ्कल्पग्राही च ॥ ५ ॥

भावाभावविषयत्वात् सङ्कल्पग्राही विचारोऽपि नैगमो भवति। देशकालोपचारलोकरूढिवशात् सङ्कल्पोऽनेकधा यथा—एधोदकाद्या[1]हरणप्रवृत्त ओदनं पचामीति, वीरनिर्वाणवासरोऽद्य[2], जातोऽयं[3] विद्वान्।

अभेदग्राही सङ्ग्रहः ॥ ६ ॥

परोऽपरश्च ॥ ७ ॥

महासामान्यविषयः परः, यथा—विश्वमेकम्, सतोऽविशेषात्। अवान्तरसामान्यविषयोऽपरः, यथा—द्रव्याणामैक्यम् द्रव्यत्वाविशेषात् पर्यायाणामैक्यम् पर्यायत्वाविशेषात्।

१—वर्तमाननैगम—अपूर्णायामपि क्रियायां पूर्णतासंकल्पः।

२—भूतनैगम—अतीते वर्तमानसंकल्पः।

३—भाविनैगम—वर्तमाने भविष्यत्संकल्पः।

भेदग्राही व्यवहार:[1] ॥ ८ ॥

यथा—यत् सत्, तद् द्रव्यं पर्यायो वा। यद् द्रव्यं तद् धर्माधर्मादिषड्विधम्। यः पर्यायः स द्विविधः—सहभावी क्रमभावी च। द्रव्यार्थिकत्वाद् असौ परमाणुं यावद् गच्छति, न तु अर्थपर्याये।

पर्यायार्थिकश्चतुर्धा ॥ ९ ॥

ऋजुसूत्रः, शब्दः, समभिरूढः, एवंभूतश्च।

वर्तमानपर्यायग्राही ऋजुसूत्रः ॥ १० ॥

यथा—साम्प्रतं सुखम्[2]।

कालादिभेदेन ध्वनेरर्थभेदकृच्छब्दः ॥ ११ ॥

(क) कालेन, यथा—बभूव, भवति, भविष्यति राजगृहम्।

(ख) संख्यया, यथा—एकः, एके।

(ग) लिङ्गेन यथा—नदम् नदी

१—अपरसंग्रहव्यवहारयोर्विषयसाम्येऽपि अपरसंग्रहः अभेदांशप्रधानः, व्यवहारश्च भेदांशप्रधानः, आद्यो भेदेऽप्यभेदं पश्यति, द्वितीयोऽभेदेऽपि भेदमित्यनयोर्विशेषः।

२—अत्र हि क्षणस्थायि सुखाख्यं पर्यायमात्रं प्राधान्येन प्रदर्श्यते, तदधिकरणभूतं पुनरात्मद्रव्यं गौणतया नार्प्यते।

पर्याये निरुक्तिभेदेनार्थभेदकृन् समभिरूढ ॥ १२ ॥

यथा—भिक्षत इत्येवंशीलो भिक्षु, वाचं यच्छतीति वाचयम, तपस्यतीति तपस्वी। शब्दनयो हि निरुक्तिभेदेऽप्यर्थमेदमभिप्रैतीत्यय ततो भिन्न ।

क्रियापरिणतमर्थं तच्छब्दवाच्य स्वीकुर्वन्नेवंभूत ॥१३॥

यथा—भिक्षुक्रियापरिणतो भिक्षु, वाचं नियच्छन् वाचयम, तपस्यन् तपस्वीत्यादि। समभिरूढ शब्दगतक्रियायामपरिणतेऽपि तद्व्यपदेशमिच्छतीत्यय ततो भिन्न ।

आद्यास्चत्वारो ऽर्थप्रधानत्वादर्थनया [1] ॥ १४ ॥

शेषास्च शब्दनया [2] ॥ १५ ॥

पूर्वं पूर्वो बहुविषय कारणभूत पर परोऽल्पविषय । कार्यभूतश्च ॥ १६ ॥

अपरथापि नयो द्विधा—निश्चयो व्यवहारश्च ॥१७॥

तात्त्विकार्थाभ्युपगमपरो निश्चय [3] ॥ १८ ॥

१—एषु चतुर्षु अर्थाश्रितो विचारो भवति।

२—एषु त्रिषु विचार शब्दाश्रितो भवति।

३—यो बादरस्कन्ध स पञ्चवर्णपुद्गलनिष्पन्नो भवति, तत्र एको वर्ण प्राधान्येन उपलभ्यते, शेषाश्च न्यग्भूतत्वान्नोपलक्ष्यन्ते।

यथा—पञ्चवर्णो भ्रमरः, [illegible]।

लोकप्रसिद्धार्थानुवादपरो व्यवहारः ॥ १९ ॥

यथा—सत्स्वपि पञ्चसु वर्णेषु श्यामो भ्रमर इत्यादिवत्।

ज्ञानक्रियाप्रधानौ क्रमाज्ज्ञानक्रियानयावपि ॥ २० ॥

गृहीतांशादितरांशापलापी नयाभासः[१] ॥ २१ ॥

[illegible][१] हि नयाभासत्वम्।

१—द्रव्यमात्रग्राही पर्यायप्रतिक्षेपी द्रव्यार्थिकाभासः।
पर्यायमात्रग्राही द्रव्यप्रतिक्षेपी पर्यायार्थिकाभासः।
धर्मद्वयादीनामैकान्तिकपार्थक्याभिसन्धिर्नैगमाभासः, यथा-
नैयायिकवैशेषिकदर्शनम्। सत्ताद्वैतं स्वीकुर्वाणः सकल-
विशेषान्निराचक्षाणः संग्रहाभासः, यथा—अद्वैतवादि-
दर्शनानि सांख्यदर्शनं च। अपारमार्थिकद्रव्य-
पर्यायविभागाभिप्रायो व्यवहाराभासः, यथा—चार्वाक-
दर्शनम्। चार्वाको हि प्रमाणप्रतिपन्नं जीवद्रव्यपर्यायादि-
विभागं कल्पनारोपितत्वेनापलपति भूतचतुष्टयविभागमात्रं
समर्थयत इति। वर्तमानपर्यायाभ्युपगन्ता सर्वथा द्रव्या-
पलापी ऋजुसूत्राभासः, यथा—तथागतमतम्। कालादि

उक्तञ्च

उदधाविव सर्वसिन्धव, समुदीर्णास्त्वयि नाथ दृष्टय ।
न च तासु भवान् प्रदृश्यते, प्रविभक्तासु सरित्स्विवोदधि ॥

भेदेनार्थभेदमेवाभ्युपगच्छन् शब्दाभास, यथा—वैयाकरणा ।
पर्यायभेदेनार्थ भेदमेव मन्वान समभिरूढाभास । क्रिया-
ऽपरिणत वस्तु शब्दवाच्यतया प्रतिक्षिपन् एवभूताभास ।
अर्थाभिधायी शब्दप्रतिक्षेपी अर्थनयाभास । शब्दाभि-
धाय्यर्थप्रतिक्षेपी शब्दनयाभास, । लोकव्यवहारमभ्युपगम्य
तत्त्वप्रतिक्षेपी व्यवहारनयाभास । तत्त्वमभिगम्य लोक
व्यवहारप्रतिक्षेपी निश्चयनयाभास । ज्ञानमेव क्रियामेव
वा मन्वानौ ज्ञानक्रियानयाभासौ ।

२—बौद्धानामृजुसूत्रतो मतमभूद् वेदान्तिनां सग्रहात्,
सांख्यानां तत एव नैगमनयाद् योगश्च वैशेषिक ।
शब्दाद्वैतविदोऽपि शब्दनयत सर्वैर्नयैर्गुम्फिता,
जैनी दृष्टिरितीह सारतरता प्रत्यक्षमुद्वीक्ष्यते ॥

प्रस्तुतार्थयोगाय[1] व्याख्यानां वाक्येषु
भेदेन न्यासः निक्षेपः ॥ २२ ॥

श्लोकादिष्वर्थानां वाक्येषु प्रकरणादिषु भेदेन प्रस्तुतस्यापि[२] करोति[३] न्यासः—निक्षेपः निक्षेपः ।

नामस्थापनाद्रव्यभावाः ॥ २३ ॥

चत्वारो हि वस्तुविन्यासप्रकारा एव निक्षेपाः स्मृताः ।
तत्तत्प्रकारेणास्तु सर्वत्र कार्यः ।

तथा च—

जत्थ य जं जाणेज्जा निक्खेवं निक्खिवे निरवसेसं ।
जत्थ वि य न जाणिज्जा चउक्कगं निक्खिवे तत्थ[४] ॥

१—निक्षेपस्यैतल्लक्षणमपि सुप्रसिद्धम् । यथा—अप्रस्तुतार्थापाकरणात् प्रस्तुतार्थव्याकरणाच्च निक्षेपः फलवान् । अप्रस्तुतार्थ इत्यप्रासङ्गिकः प्रस्तुतस्तु प्रासङ्गिकः तदर्थमेव इत्यादि तत्त्वार्थं प्रकारेण निक्षेपः प्रस्तुतार्थव्याख्यार्थं च निक्षेपः क्रियते ।

२—सर्वेषां ग्रन्थानामपि मतम् ।

३—परस्परविलक्षणमर्थं व्यञ्जयन् ।

४—यत्र यत्र च यं जानीयात्, निक्षेपं निक्षिपेत् निरवशेषम् ।
यत्रापि च न जानीयात्, चतुष्कं निक्षिपेत् तत्र ॥

तदर्थनिरपेक्षं संज्ञाकर्म नाम ॥ २४ ॥

जातिद्रव्यगुणक्रियालक्षणनिमित्तमनपेक्ष्य सङ्केतमात्रेणैव संज्ञाकरणं नाम[1] भण्यते, यथा—अनक्षरस्य उपाध्याय इति नाम ।

तदर्थशून्यस्य तदभिप्रायेण प्रतिष्ठापनं स्थापना ॥ २५ ॥

तदर्थविरहितस्य द्रव्यस्य 'सोऽयम्' इत्यध्यवसायेन व्यवस्थापनं स्थापना, यथा—उपाध्यायप्रतिकृतिः स्थापनोपाध्यायः । तत्र मुख्याकारसमाना सद्भावस्थापना, तदाकारशून्या चासद्भावस्थापना ।

भूतभाविभावस्य कारणमनुपयोगो वा द्रव्यम् ॥२६॥

यथा—अनुभूतोपाध्यायपर्यायोऽनुभविष्यमाणोपाध्यायपर्यायो वा द्रव्योपाध्यायः[2] । यथा वा अनुपयोगाऽवस्था क्रिया द्रव्यक्रिया । क्वचिदप्राधान्येऽपि, यथा—अङ्गारमर्दको द्रव्याचार्यः, आचार्यगुणरहितत्वात् ।

१—यद्वस्तुनोऽभिधानं, स्थितमन्यार्थे तदर्थनिरपेक्षम् ।
पर्यायानभिधेयं, च नाम यादृच्छिकं तथा ॥

२—भूते भाविनि वा घृतघटे घृतघटव्यपदेशवदत्रापि उपाध्यायव्यपदेशः ।

अयं च आगम[1] द्विधा उक्तः—आगमतः,[2] नोआगमतश्च[3]। तत्र आगमतः—जीवादिपदार्थज्ञोऽपि तत्राऽनुपयुक्तः। नोआगमतस्त्रिधा—ज्ञशरीरं भव्यशरीरं, तद्व्यतिरिक्तश्च[4]।

विवक्षितक्रियापरिणतो भावः ॥ २७ ॥

अयमपि आगम-नोआगम भेदात् द्विधा—

तत्र उपाध्यायार्थज्ञस्तदुपयोगपरिणतश्च आगमतो भावोपाध्यायः। उपाध्यायार्थज्ञः अध्यापनक्रियाप्रवृत्तश्च नोआगमतो भावोपाध्यायः। एषु[5] नामादिषु द्रव्याधिकनयस्य विषयो भावश्च पर्यायार्थिकस्य[6]।

१—अनुयोगद्वारनाम्नि सूत्रे।

२—आगमो ज्ञानम्, तदाश्रित्य—आगमतः।

३—अयात् आगमाभावमाश्रित्य। नो शब्द् आगमस्य सर्वथाऽभावे देशाभावे च। तत्र ज्ञभव्यशरीरे सर्वथाऽभावः। अनुपयुक्तस्य यां क्रियां कुरुते, तस्यामागमस्याऽभावात् देशाभावः। त्रिपान्त्यौ देश एव निषेधः।

४—यत्र ज्ञशरीरभव्यशरीरयोः पूर्वोक्तं लक्षणं न घटते, तत् ताभ्यां व्यतिरिक्तम्।

५—निक्षेपेषु।

६—जिनविषये तावन्निक्षेपचतुष्टयम्—नाम जीवस्याऽजीवस्य [illegible] जिन

निक्षिप्तानां निर्देशादिभिरनुयोगः ॥ २८ ॥

अनुयोगः—व्याख्या ।

निर्देशस्वामित्वसाधनाधारस्थितिविधानसत्संख्याक्षेत्र-
स्पर्शनकालान्तरभावाल्पबहुता [१] ॥ २९ ॥

तत्र निर्देशः—नामकथनम् । विधानम्—प्रकारः ।

सत्—अस्तित्वम् । अन्तरम्—विरहकालः ।

भावः—औदयिकादिः । अल्पबहुता—न्यूनाधिकता ।

इति श्रीतुलसीगणिनिर्मितायां श्री भिक्षुन्यायकर्णिकायां नयनिक्षेपस्वरूपनिर्णयो नाम पञ्चमो विभागः ।

इति नाम क्रियते स 'नाम जिन' । लेप्यादिमयी जिनस्य प्रतिमा 'स्थापना जिन' । निबद्धजिन(तीर्थंकर) नामगोत्रो भावदशायामवर्तमानो 'द्रव्य जिन' । प्रादुर्भूतक्षायिकज्ञानदर्शनचतुस्त्रिंशदतिशयशाली स्थापिततीर्थचतुष्टयो 'भाव-जिन' ।

१—यत्र अवगाहनम् क्षेत्रमुच्यते । यत्तु अवगाहनातो बहिरपि अतिरिक्तं क्षेत्रं स्पृशति सा 'स्पर्शना'ऽभिधीयते इति क्षेत्रस्पर्शनयोर्विशेषः ।

षष्ठो विभाग.

प्रमाणस्य विषय सदसन्नित्यानित्यसामान्यविशेष-वाच्यावाच्याद्यनेकान्तात्मक वस्तु ॥१॥

पर्यायान्वयि ध्रौव्य सत् ॥२॥

उत्तरोत्तराकाराणामुत्पत्ति—उत्पाद, पूर्वपूर्वाकाराणां विनाश—व्यय। एतद्द्वयपर्यायान्वयि एव[1] ध्रौव्य सत् उच्यते। उत्पादादय कथञ्चित् भिन्नाभिन्ना, तत एव सत् त्रयात्मकम्।

उक्तञ्च —

> घटमौलिसुवर्णार्थी, नाशोत्पादस्थितिष्वयम्।
> शोकप्रमोदमाध्यस्थ्य, जनो याति सहेतुकम्॥
> उत्पन्न दधिभावेन नष्ट दुग्धतया पय।
> गोरसत्वात् स्थिर जानन्, स्याद्वादद्विड् जनोऽपि क॥

तदितरदसत् ॥३॥

यन्नोपपद्यते [illegible] व्येति न च ध्रुव तदसत्। यथा—आकाश-कुसुमम्।

१—सत् केवल पर्यायात्मक ध्रौव्यात्मक वा न भवति तादृशस्य कस्यापि पदार्थस्य अभावात्।

सतोऽप्रच्युतिर्नित्यम् ॥४॥

परिणमनमनित्यम् ॥५॥

वस्तुनः सत्स्वरूपस्य अप्रच्युतिः—नित्यम्। तस्यैव च तत्तद्रूपतया परिणमनम्[1]—अनित्यम्।

अभेदप्रतीतेर्निमित्तं सामान्यम्[2] ॥६॥

प्रतिव्यक्ति तत् तिर्यक् सामान्यम्, यथा घटनिम्बादिषु वृक्षत्वम्। क्रमभाविपर्यायेषु च ऊर्ध्वतासामान्यम्, यथा—बाल्ययौवनाद्यनुयायिपुरुषत्वम्।

भेदप्रतीतेर्निमित्तं विशेषः ॥७॥

जातिरूपेणाऽभिन्नेष्वपि वृक्षेषु वटोऽयम्, पिप्पलोऽयम्, निम्बोऽयमित्यादि वैसदृश्यस्य निमित्तभूतो धर्मः—विशेषः।

१—न च सर्वथा विनाशः, न च सर्वथा उत्पादः, किन्तु अवस्थान्तरापादनम्।

२—तिर्यक् सामान्ये बहूनां व्यक्तीनां केनचित् तुल्येन धर्मेण एकता प्रतीयते, ऊर्ध्वतासामान्ये च एकस्या एव व्यक्तेः भिन्नासु पूर्वापरासु अवस्थासु अनुयायिन्या एकता प्रतीयते इति आद्या द्रव्ययोर्द्रव्याणां वा जातिगता एकता, अपरा च एकस्यैव द्रव्यस्य पर्यायगता एकता इति तत्त्वम्।

गुणपर्यायभेदाद् द्विरूपः ॥८॥

गुणः—सहभावी धर्मः, यथा—आत्मनि विज्ञानम्; पर्यायश्च क्रमभावी, यथा—तत्रैव सुख-दुःखादि।

वाग्गोचरं वाच्यम् ॥९॥

वागविषयमवाच्यम् ॥१०॥

विवक्षाऽविवक्षात्त मगसि ॥११॥

प्रयोजनवशात् कश्चिद् धर्मो विवक्ष्यते, कश्चिच्च सन्नपि प्रयोजनाभावान्न विवक्ष्यते। यथा—धर्मिणः नित्यत्वविवक्षायां सन्तावप्युत्पादव्ययौ नोपात्तौ, अनित्यत्वविवक्षायाञ्च सदपि ध्रौव्यं नार्प्यते। तत एव सहावस्थितानामप्येषां प्रधानाप्रधानग्रहणेन एकोऽपि धर्मी नित्योऽनित्यश्च। एवमनुवृत्ताकारेण सामान्यम्, व्यावृत्तरूपेण विशेषः, स्वरूपेण सत्, पररूपेण असत्, एकैकधर्मापेक्षया वाच्यम्, युगपद् अनेकधर्मापेक्षया अवाच्यम्। इत्यन्ये च एकस्मिन्नपि चैत्रादौ अपेक्षाभेदात् पितृत्वभ्रातृत्वपुत्रत्वमातुलत्वभागिनेयत्वादयः पर्यायाः।

प्रमाणस्य फलमर्थबोधः ॥१२॥

अर्थ[1] प्रमाणमात्रस्य साक्षात्फलम्।

१—अर्थबोध।

सामस्त्येन केवलज्ञानस्य[१] माध्यस्थ्यम्, शेषप्रमाणानां हानोपादानमाध्यस्थ्यबुद्धयः[२]

प्रमाणतः स्यात् भिन्नमभिन्नञ्च ॥१३॥

एकान्तभेदे हि इदमस्य प्रमाणस्य फलमिति सम्बन्धो न घटते। एकान्ताभेदे च प्रमाणमेव वा फलमेव वा तद् भवेदिति।

एकप्रमातृतादात्म्येन तस्मादभिन्नम् ॥१४॥

प्रमाणतया परिणत एव आत्मा फलतया परिणमते इत्येकप्रमात्रपेक्षया प्रमाणफलयोरभेदः।

साध्यसाधनभावेन तयोर्भेदः ॥१५॥

प्रमाणम्—साधनम्, फलं साध्यमिति।

अवग्रहादीनां क्रमिकत्वात् पूर्वं पूर्वं प्रमाणमुत्तरमुत्तरं फलम् ॥१६॥

यथा—अवग्रहः प्रमाणम्, ईहा फलम्, एवमुत्तरं यावत्।

इति श्रीतुलसीगणिविनिर्मितायां श्रीभिक्षुन्यायकर्णिकायां प्रमेयप्रमितिस्वरूपनिर्णयो नाम षष्ठो विभागः

१—केवलिनो हि सर्वान् समस्तार्थानुपेक्षेऽपि हानोपादानेच्छाविरहाद् माध्यस्थ्यबुद्धिः।

२—हेये परित्यागबुद्धिः, उपादेये ग्रहणबुद्धिः उपेक्षणीये उपेक्षाबुद्धिः।

सप्तमो विभाग

स्वपरावभासी प्रत्यक्षादिप्रसिद्ध आत्मा प्रमाता ॥१॥

स्वस्य परस्य चावभासने प्रकाशयितुं स्वभावशील, अहं सुखी, अहं दुःखीत्यादि निदर्शनेन, प्रत्यक्षादिप्रमाणेन प्रतीत आत्मा प्रमाता प्रमाणकर्तेति यावत्।

चैतन्यलिङ्गोपलम्भेस्तद्ग्रहणम् ॥२॥

अन्योऽपि पदार्थो लक्ष्यमानलिङ्गेन गृह्यत एव, यथाऽपवरकस्थितेनाप्यदृष्टोऽपि सविता प्रकाशातपाभ्याम्, तथैव चैतन्यलिङ्गेन आत्मा।

न तज्जडलक्षणभूतधर्मः ॥३॥

तदिति चैतन्यम्।

उपादाननियमात् ॥४॥

क उपादानमर्यादामनुभवन्नपि जडलक्षणाद्भूताच्चैतन्यं प्रसाधयितुमायुष्मान्।

नासदुत्पादः ॥५॥

न खलु समुदितेष्वपि भूतेषु अत्यन्तासत्त्वस्य चैतन्यस्योत्पत्तिः सम्भविनी। यथा—सिकताकणेषु प्रत्येकमनुपलभ्य तैलं न समुदितेष्वपि, सतो व्यक्तौ तु सिद्ध्यति सर्वथा चैतन्यवादः।





नापि मस्तिष्कमूलम्, मस्तिष्कस्य तु तत्प्रयोगहेतु मात्रत्वात् ॥६॥

येन यस्य मूलं मस्तिष्कं न भवति, तत्तु विशिष्टचैतन्ययमनसः प्रयोगसाधनमात्रमस्ति।

शोणितं तु प्राणशक्त्यनुगाम्येव ॥७॥

रक्तं हि प्राणशक्तिनिमित्तं भवति, तद्विरहे तस्यानुत्पादात्, अन्यथा तद्गतिनिरोधस्य निर्हेतुकत्वात्। किञ्च सात्मके शरीरे आहारग्रहणम्, ततः शोणितोत्पत्तिः, श्वासोच्छ्वासेन तस्याऽखिले वपुषि सञ्चारः, तेन शरीरावयवानां सक्रियत्वम्। ततो हीन्द्रियाणि मनश्च गृह्णन्ति स्वप्रमेयम्। देहिनि अन्यत्र गते सर्वत्रापि निष्क्रियत्वोपलब्धेः।

प्रेत्यसद्भावाच्च ॥८॥

पुनरुत्पत्तिः—प्रेत्यभावः। तेनाप्यात्मनः सत्त्वं प्रतिपत्तव्यम्।

शरीराग्रहरूपचेतसः सम्भवात् तत्सद्भावः ॥९॥

नवोत्पन्नस्य प्राणिनो निजशरीरविषय आग्रहः। स तद्विषय-परिशीलनपूर्वकः। न खलु अत्यन्ताज्ञातगुणदोषे वस्तुन्याग्रहो दृष्टः।

हर्षभयशोकोपलब्धेरपि पूर्वाभ्यस्तस्मृत्यनुबन्धात् ॥१०॥

अत्र खलु बालः पूर्वाभ्यासस्मृतिनिमित्तान् हर्षादीन् प्रतिपद्यते । पूर्वाभ्यासश्च पूर्वजन्मनि सति, नान्यथा ।

इति श्रीतुलसीगणिनिर्मितायां श्रीभिक्षुन्यायकर्णिकायां प्रमाणस्वरूपनिर्णयो नाम सप्तमो विभागः ।

अष्टमो विभागः

षड्द्रव्यात्माऽनाद्यनन्तो लोकः ॥१॥

धर्माधर्माकाशकालपुद्गलजीवा द्रव्याणि ॥२॥

क्रमशः गतिस्थित्यवगाहपरिणमनहेतुत्वग्रहणचैतन्यलक्षणैर्विशिष्टगुणैरनुभूयमानास्तित्वानि षड् द्रव्याणि सन्ति ।

धर्माधर्माकाश[1]ैकजीवानामसंख्येयाः प्रदेशाः ॥३॥

कल्पनया परमाणुपरिच्छिन्नो द्रव्यस्याऽपृथग्भूतोऽवयवः—प्रदेशः

पुद्गलस्य संख्येयाऽनन्ताश्च[2] ॥४॥

कालोऽप्रदेशी ॥५॥

न चास्य अणवः, न च प्रदेशा इति औपचारिकोऽयम् ।

१—अलोकाकाशस्याऽनन्ता अपि ।

२—चकारादसंख्येया अपि ।

आद्यानीण्येकानि निष्क्रियाणि व्यापिकानि च ॥६॥

एतानि गत्यादिक्रियाया न प्रवर्तकानि किन्तु तत्र प्रवर्तमानस्य उदासीनतया निमित्त भवन्तीति निष्क्रियाणि अथवा व्यञ्जनपर्याया-पेक्षया।

शेषाण्यनेकानि[1] सक्रियाणि च ॥७॥

कालोऽव्यापकोऽपि ॥८॥

वर्तनालक्षणो नैश्चयिक कालः सर्वत्रापि, किन्तु सूर्यचन्द्रकृतो व्यावहारिको मनुष्यक्षेत्र एवेति अव्यापकोऽपि।

पुद्गलजीवाश्च प्रतिनियतावगाहाः ॥९॥

पुद्गला —अणवो नभस प्रत्येकस्मिन् प्रदेशे, स्कन्धाश्च एक-स्मिन्नपि, स्वपरिमाणप्रदेशेषु, उत्कर्षतस्त्वासर्वेषु। जीवा स्वदेह-परिमाणा[2]। मुक्ताश्च पूर्वदेहस्यौत्सेधात् त्रिभागहीनावगाहा।

जीवपुद्गलयोर्विविधसयोगः स विविधरूप ॥१०॥

स इति लोक। इयं विविधरूपता एव सृष्टिरिति कथ्यते।

१—अनन्तानि।

२—केवलिसमुद्घातसमये लोकव्यापिनो अपि।

सयोगश्चापश्चानुपूर्विक [1] ॥११॥

कर्मशरीरोपग्रहरूपेण त्रिविध ॥१२॥

कर्माणि—आत्मन स्वस्वभावावारकाणि, शरीर स्पष्टम्, उपग्रह —
आहारकायमन श्वासोच्छ्वासा ।

शेषद्रव्यशून्यमाकाशमलोक ॥१३॥

जीवाजीवपुण्यपापास्रवसवरनिर्जराबन्धमोक्षास्तत्त्व म

जीवा बद्धा मुक्ताश्च ॥१४॥

अजीवत्—पुद्गलस्कन्धेन बद्धाबद्धत्वाज्जीवा द्विविधा ।

पृथिव्यप्तेजोवायुवनस्पतयस्त्रसाश्च बद्धा ॥१६॥

सम्मूर्च्छिमा गर्भोपपातजाश्च ॥१७॥

त्रसास्त्रिविधा अपि, शेषा (स्थावरा) सम्मूर्च्छिमा एव ।

गर्भजा कालादिभेदेन शरीरादिभेदेऽप्यजाताऽन्य
जातय ॥१८॥

कालदेशपरिस्थितीनां भेदेन शरीरसस्थानसहननाऽवगाहवर्ण
भेदेऽपि गर्भजानां जातय—यथा मनुष्यो नोऽपद्यते स तश्च
नामनोऽपि भवन्ति तत एव न क्रमविकासवादो युक्तिमान् ।

१—न पश्चात् न पूर्वम् ।

मिथ्यात्वाऽविरतिप्रमादकषाययोगैराश्रवैर्बंध ॥१९॥

शुभं पुण्यमशुभञ्च पापम् ॥२०॥

सम्यक्त्वविरत्यप्रमादाऽकषायाऽयोगै संवरैस्तन्निरोध ॥२१॥

तपोरूपया निर्जरया तत्क्षये मोक्ष ॥२२॥

तेनाऽऽविर्भूतमनात्मभावा मुक्ता ॥२३॥

आत्मभावा —अनन्तज्ञानदर्शनादय [१]।

इति श्रीतुलसीगणिनिर्मिताया श्रीभिक्षुन्यायकर्णिकायां प्रमयान्तर्गतषड्द्रव्यनवतत्त्वस्वरूपनिर्णयो नाम अष्टमो विभाग ।

१—आदिशब्दात्—सुखसम्यग्दर्शनवीर्याशरीराऽचलाऽवगाहाऽगुरुलघुत्वानि ।

प्रशस्ति श्लोका

स्याच्छब्दाङ्कितसप्तभङ्गसलिलव्यूहैर्गभीरोऽन्तर,
सत्त्वार्थप्रतिपादिसन्नयकलाकल्लोलमालाकुल ।
सद्विद्वज्जनसमुच्चयेन मथित सत्कल्पेनाद्भुत,
सोऽयं कस्य मुदे न सान्द्रमहिमा स्याद्वादपाथोनिधि ॥१॥

यस्याज्ञाजलधौ यदृच्छगदना समायान्ति यतौ जना
छित्वा विभ्रमधर्मपूरमपुषा सद्बोध्य तूर्णं नृणाम् ।
वाक्सन्दमसरिच्छवाहनिकरै सञ्चयत्येव यत् ,
सोऽयं कस्य मुदे न सान्द्रमहिमा स्याद्वादपाथोनिधि ॥२॥

यद्वक्त्रे मेधावा फलमतुल्यमापन् पशुरपि,
मृगारि पश्चाद्योऽभवदिह यद्वाग्गुरधिक ।
अनेकान्ताम्भोधिविधुमिव यमालोक्य मुदित ,
स मां धीमान् वीरस्तरमजिनराजोऽवतुतमाम्

तच्छासनं सुविशदीकृतवानलं यः
स्वार्थानुगं कुमतिभिर्मलिनीकृतं यत् ।
नैनाद्भमप्यतिनमां लभते स्म तेरा
पन्थाग्रया यदनुभावकृतां प्रसिद्धिम् ॥४॥

द्वीपाल[७] सिद्धि[१] शशि[१]-सवति[८] वैक्रमीये,
येनादृता जिनमताद्भुतता सुदीक्षा ।
सोऽयं स्फुटीकृतमरुस्थलवीरभूमिः,
यैनांवगम्यत इति व्रतिराजभिक्षुः ॥५॥ युग्मम् ।

भारमल्लो विमलोऽस्य पदे, तदनु च रायचन्द्रगुरुः ।
जीतमलस्तुर्यो जज्ञे, तत्तुल्यो स्यात् सर्वे ॥६॥

अथ पञ्चमपराजगणी, जिनदर्शनमुकुटाग्रमणिः ।
माणिकलालडालचन्द्रौ, गणधरक्षणनिस्तन्द्रौ ॥७॥

छोगेयोऽष्टमपट्टपतिः कालू करुणाब्धिः सुकृती ।
यदनुग्रहतोऽस्मादृगिति, ग्रन्थग्रथने प्रथितमतिः ॥८॥

स्वर्णपर्वसिन्ध पदाम्बुजानुग ।
प्रमोदमानतुल्मी मुनीशिता ।
त्रिवाह्वदता प्रादरदायकर्णिका
सत्पात्रपायीन्द्रि शास्त्रमर्दनि ॥९॥

मेघ॰ व्योम॰ध्यान वेदा॰ विनेडग्,
माडे मास शुक्लपक्षे नवम्याम् ।
भूम वार साध्य मध्यवारे,
प्रातःकाले प्रादुर्भाववृद्धिकारे ॥१०॥

धर्मीति धार्मिक देहो, थं भूरगाद पुरं ।
समाप्तेय मदा पुमर्थ मम त्रिपुण्ये युगम् ॥११॥ शुभम् ।